PSBB Learning Leadership Academy

Bangalore-2021

Class:- VIII   Sub:- Sanskrit ii Lang

Topic:- पाठः-15 लोभो न कर्तव्यः

---

## पञ्चदशः पाठः

# लोभो न कर्त्तव्यः

## (DO NOT BE GREEDY)

कस्मिंश्चिद् वने एकः वृद्धः व्याघ्रः अवसत्। सः नद्याः तीरे स्थित्वा स्वहस्ते च एकं सुवर्णकङ्कणं गृहीत्वा इदं कथयति स्म—"भो पथिकाः! इदं सुवर्णकङ्कणं गृह्यताम्।" परं कस्यचिदपि पथिकस्य तस्मिन् व्याघ्रे विश्वासो नासीत्। अतः तस्य वचनं श्रुत्वा सर्वे दूरमेव अतिष्ठन्।



एकदा लोभेनाकृष्टः एकः पथिकः अचिन्तयत्—"भाग्येनैव एतत् सम्भवति। परं व्याघ्रः हिंसकः भवति इति मत्वा विश्वासयोग्यो नास्ति।" सः तं व्याघ्रमपृच्छत्—"कुत्रास्ति तत् सुवर्णकङ्कणम्?" व्याघ्रः स्वहस्तं प्रसार्य सुवर्णकङ्कणम् अदर्शयत्। ततः सः पथिकः तं व्याघ्रमवदत्—"त्वं हिंसकोऽसि अतः न विश्वासयोग्यः।" तदा पथिकस्य संशयं दूरीकर्तुं व्याघ्रोऽभणत्—"यौवनकालेऽहम् अनेकान् पशून् नरान् चामारयम्। एतस्मात् कारणात् मम भार्या पुत्राः च अनश्यन्। इदानीमहं वंशहीनः संवृत्तः। एकदा कश्चिद् धार्मिकः मामुपादिशत्—'धनं यच्छ धर्मं चाचरेति।' तदुपदेशादेव अहं प्रतिदिनं स्नानं करोमि धनं यच्छामि धर्मं चाचरामि। इदानीमेतत् सुवर्णकङ्कणं यस्मै कस्मैचिद् दातुमिच्छामि।" एतत् श्रुत्वा पथिकः आश्वस्तः अभवत्। तदा व्याघ्रः तमकथयत्—"त्वम् अस्यां नद्यां स्नात्वा इदं कङ्कणं गृहाण।" यावत् असौ पथिकः स्नातुं नद्यां प्राविशत् तावदेव महापङ्के निमग्नोऽभवत्। तं पङ्के पतितं दृष्ट्वा व्याघ्रोऽवदत्—"त्वं तु पङ्के निमग्नोऽसि। अतः अहं त्वाम् उद्धरिष्यामि" इत्युक्त्वा व्याघ्रः तस्य पथिकस्य समीपमगच्छत् तं चाभक्षयत्।



तथा चोक्तम्—

कङ्कणस्य तु लोभेन मग्नः पङ्के सुदुस्तरे।<br>
वृद्धव्याघ्रेण संप्राप्तः पथिकः स मृतो यथा॥

## शब्दार्थाः (WORD-MEANINGS)

| | | | |
|---|---|---|---|
| व्याघ्रः | = | बाघ | Tiger |
| पथिकः | = | पथिक | Traveller |
| गृहाण | = | ग्रहण कर लो, ले लो | Take, have |
| आकृष्टः | = | आकर्षित | Attracted |
| सुवर्णकङ्कणम् | = | सोने का कंगन | Golden bracelet, bangle |
| संभव् (सम्+भू) | = | सम्भव होना | To be possible |
| हिंसकः | = | हिंसक (पशु) | Beast of prey |
| प्रसार्य | = | फैलाकर | Having stretched out |
| पङ्के | = | कीचड़ में | In the mud, mire |
| निमग्नः | = | धँसा हुआ, डूबा हुआ | Immersed |
| उद्धर् (उद्+धृ) | = | निकालना | To take out |
| सुदुस्तरे | = | जिसको पार करना अत्यन्त कठिन हो | Which is very difficult to cross |

## अभ्यासः (EXERCISE)

1. **निम्नलिखित प्रश्नों के उत्तर संस्कृत में दीजिए**
   **(Answer the following questions in Sanskrit)**

   (क) वने कः अवसत्? ..............................

   (ख) व्याघ्रः किं गृहीत्वा नद्याः तीरे अतिष्ठत्? ..............................

   (ग) व्याघ्रः किं कथयति स्म? ..............................

   (घ) व्याघ्रः कदा अनेकान् पशून् नरान् च अमारयत्? ..............................

   (ङ) धार्मिकः व्याघ्रं किम् उपादिशत्? ..............................

   (च) पथिकः कदा महापङ्के निमग्नोऽभवत्? ..............................

   (छ) किं व्याघ्रः पथिकम् अभक्षयत्? ..............................

   (ज) कः वंशहीनः संवृत्तः? ..............................

   ..............................

2. रिक्त स्थान भरिए (Fill in the blanks)

(क) ........................ एव एतत् सम्भवति।

(ख) व्याघ्रस्य हस्ते एकं ........................ आसीत्।

(ग) व्याघ्रः ........................ न भवति।

(घ) ........................ अनेकान् पशून् अमारयत्।

(ङ) व्याघ्रः ........................ अभक्षयत्।

(च) त्वम् अस्यां नद्यां ........................ इदं कङ्कणं गृहाण।



3. निम्नलिखित में सन्धि-विच्छेद कीजिए

(Disjoin Sandhis in the following)

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| भाग्येनैव | = | ............... | + | ............... | व्याघ्रोऽभणत् | = | ............... | + | ............... |
| इत्युक्त्वा | = | ............... | + | ............... | चाचर | = | ............... | + | ............... |
| यौवनकालेऽहम् | = | ............... | + | ............... | नासीत् | = | ............... | + | ............... |
| हिंसकोऽसि | = | ............... | + | ............... | चाचरामि | = | ............... | + | ............... |
| निमग्नोऽभवत् | = | ............... | + | ............... | चाभक्षयत् | = | ............... | + | ............... |
| निमग्नोऽसि | = | ............... | + | ............... | चोक्तम् | = | ............... | + | ............... |

4. निम्नलिखित वाक्यों को पाठ के अनुसार क्रमबद्ध कीजिए

(Arrange the following sentences sequentially in accordance with the lesson)

(क) कस्यचिदपि पथिकस्य तस्मिन् व्याघ्रे विश्वासो नासीत्। ☐

(ख) व्याघ्रः तस्य पथिकस्य समीपमगच्छत्। ☐

(ग) पथिकः व्याघ्रम् अपृच्छत्—'कुत्रास्ति तव सुवर्णकङ्कणम्?' ☐

(घ) वने एकः वृद्धः व्याघ्रः अवसत्। ☐

(ङ) पथिकः आश्वस्तः अभवत्। ☐

**5. किसने कहा ? किससे कहा ? (Who said? To whom?)**

(क) इदं सुवर्णकङ्कणं गृह्यताम्। ........................................

(ख) इदानीमहं वंशहीनः संवृत्तः। ........................................

(ग) कुत्रास्ति तत् सुवर्णकङ्कणम् ? ........................................

(घ) अतः अहं त्वाम् उद्धरिष्यामि। ........................................

**6. सही उत्तर पर (√) चिह्न लगाइए (Tick the correct answer)**

(क) स्वहस्तं प्रसार्य सुवर्णकङ्कणं कः अदर्शयत् ?

(*i*) पथिकः ☐ (*ii*) व्याघ्रः ☐

(*iii*) धार्मिकः ☐ (*iv*) वृद्धः ☐

(ख) व्याघ्रः कस्य समीपम् अगच्छत् ?

(*i*) धार्मिकस्य ☐ (*ii*) स्वपुत्रस्य ☐

(*iii*) पथिकस्य ☐ (*iv*) पशोः ☐

(ग) व्याघ्रः यस्मै कस्मैचिद् किं दातुमिच्छति ?

(*i*) धनम् ☐ (*ii*) सुवर्णकङ्कणम् ☐

(*iii*) वस्त्रम् ☐ (*iv*) ज्ञानम् ☐

(घ) कः नद्यां स्नातुं प्राविशत् ?

(*i*) पथिकः ☐ (*ii*) व्याघ्रः ☐

(*iii*) धार्मिकः ☐ (*iv*) व्याघ्रः पथिकः च ☐

(ङ) कः प्रतिदिनं धर्मम् आचरति ?

(*i*) पथिकः ☐ (*ii*) धार्मिकः ☐

(*iii*) व्याघ्रः ☐ (*iv*) जनः ☐

**संक्षेप में इस पाठ में हमने ये बातें सीखीं :**

लोभ करने का परिणाम अत्यन्त दुःखदायी होता है, इसलिए लोभ कभी नहीं करना चाहिए।

नई धातुएँ

उद्धर् (उद् + धृ) संभव् (सम् + भू)

**रचनात्मक कार्य**

इस कहानी को एक नाटक के रूप में प्रस्तुत कीजिए।